# Shri Divakaracharyakritah Shriramabrahma Stava

# શ્રીદિવાકરાચાર્યકૃતઃ શ્રીરામબ્રહ્મસ્તવઃ

## Document Information

Text title : Shri Divakaracharyakritah Shriramabrahma Stava

File name : shrIrAmabrahmastavaHdivAkarAchArya.itx

Category : raama, rAmAnanda, aShTaka

Location : doc_raama

Author : divAkarAchArya

Transliterated by : Mrityunjay Pandey

Proofread by : Mrityunjay Pandey

Description/comments : From Chatuh Sampradaya Dig-Darshanm

Latest update : December 3, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 3, 2023

*sanskritdocuments.org*

# શ્રીદિવાકરાચાર્યકૃતઃ શ્રીરામબ્રહ્મસ્તવઃ

આનન્દભાષ્યકૃદ્રામાનન્દં રામં પરેશ્વરમ્ ।
કુર્વે ગુરું ચ નત્ત્વાઽહં રામબ્રહ્મસ્તવં શુભમ્ ॥ ૧॥

જગતઃ સર્જકો યશ્ચ પાલકો હારકસ્તથા ।
વન્દે દિવાકરસ્થં તં શ્રીરામં બ્રહ્મસંજ્ઞકમ્ ॥ ૨॥

પ્રણેતા યશ્ચ વેદાનાં પૂર્વકલ્પાનુસારતઃ ।
વન્દે દિવાકરસ્થં તં શ્રીરામં બ્રહ્મસંજ્ઞકમ્ ॥ ૩॥

શ્રેષ્ઠપ્રમાણરૂપા હિ શ્રુતયો યત્ર ચાન્વિતાઃ ।
વન્દે દિવાકરસ્થં તં શ્રીરામં બ્રહ્મસંજ્ઞકમ્ ॥ ૪॥

શ્રીરામાયણ સંજ્ઞં યચ્ચરિતં પાપનાશકમ્ ।
વન્દે દિવાકરસ્થં તં શ્રીરામં બ્રહ્મસંજ્ઞકમ્ ॥ ૫॥

નામ ધામ ચરિત્રં ચ રૂપં યસ્ય પરાત્પરમ્ ।
વન્દે દિવાકરસ્થં ત શ્રીરામં બ્રહ્મસંજ્ઞકમ્ ॥ ૬॥

યસ્ય ભક્ત્યા પ્રપત્ત્યા ચ મુક્તિર્ભવતિ નાન્યથા ।
વન્દે દિવાકરસ્થં તં શ્રીરામં બ્રહ્મસંજ્ઞકમ્ ॥ ૭॥

ભાસકો ભાસ્કરાદેર્યો યમાદેર્ભયદશ્ચ યઃ ।
વન્દે દિવાકરસ્થં તં શ્રીરામં બ્રહ્મસંજ્ઞકમ્ ॥ ૮॥

દ્વારપીઠેશ્વર શ્રીમદ્દિવાકરાર્યનિર્મિતઃ ।
ભક્તિમુક્તિપ્રદો ભૂયાદ્ રામબ્રહ્મસ્તવઃ શુભઃ ॥ ૯॥

ઇતિ શ્રીદિવાકરાચાર્યકૃતઃ શ્રીરામબ્રહ્મસ્તવઃ સમ્પૂર્ણઃ ।

Encoded and proofread by Mrityunjay Pandey

*Shri Divakaracharyakritah Shriramabrahma Stava*

pdf was typeset on December 3, 2023

Please send corrections to *sanskrit@cheerful.com*